CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

॥श्रीगणेशायनमः॥देव्युवाच॥देवकेनविधानेनशुक्लपक्षेत्रयोदशी॥विधातव्यानरैः
स्त्रीभिःसंतानफलसिद्धये॥१॥ईश्वरउवाच॥उद्यापनविधिंवक्ष्येशृणुयत्नेनपार्वती॥य
दात्रयोदशीशुद्धामंदवारेणसंयुता॥२॥आरब्धव्यंव्रतंतत्रसंतानफलसिद्धये॥ऋण
निर्मोचनार्थंतुभौमवारेणसंयुता॥३॥सौभाग्यस्त्रीसमध्यर्थंभृगुवारेणसंयुता॥आ
युरारोग्यसिध्यर्थंभानुवारेणसंयुता॥४॥एकवत्सरपर्यंतंप्रतिपक्षेत्रयोदशी॥घ
टीत्रयादस्तमयात्पूर्वंस्नानंसमाचरेत्॥५॥शुक्लांबरधरोभूत्वावाग्यतोनियमान्वितः॥
कृतसंकल्पविधिवत्ततःपूजांसमारभेत्॥६॥कर्षमात्रसुवर्णेनतदर्द्धेनवापुनः॥द्वा
दशप्रतिमाःकार्याःशिवरुद्रादिनामभिः॥७॥उमामहेश्वरंदेवंदंपत्योक्तस्यचतुर्थिणं॥त
र्धंवातदर्धंवाविलक्षणंनकारयेत्॥८॥वस्त्रमंडपिकांकृत्वाचतुर्द्वारोपशोभितां॥द्वारे

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

षुचतुरोवेदान्द्वौवेदौवेदमेववा॥९॥पारायणपरान्विप्रान्अर्चयित्वातुयोजयेत्। आचार्यंवरयेत्पूर्वंस्वस्तिवाचनपूर्वकं॥१०॥वेदवेदांगतत्वज्ञंशांतंदांतमकोपनं।अभ्यर्च्यगंधपुष्पाद्यैर्भूषणाच्छादनादिभिः॥११॥ऋत्विजोवेदसंपन्नान्व्रतकर्मणिकोविदान्। सपत्नीकानागमज्ञान्सदाचारपरायणान्॥१२॥अभ्यर्च्यगंधपुष्पाद्यैर्वस्त्रैराभरणादिभिः।यदात्रयोदशीशुद्धामलमासादिवर्जिता॥१३॥तदोद्यापनमारभ्यऋत्विग्भिःसहयजयेत्। अथाचार्योद्विहस्तेनकुर्वीतस्थंडिलंसमं॥१४॥चतुरंगकवर्णैश्चनीलपीतैःसितासितैः।दशस्वस्तिकसंयुक्तंलिंगान्यप्यर्कसंख्यया॥१५॥तन्मध्येष्टदलंपद्मंस्थापयेद्वसुरसुरान्प्रत्येकंद्रोणमानेनत्रीह्यादींश्चप्रकल्पयेत्॥१६॥तदर्धंतंडुलान्कृत्वातिलांश्चापितदर्धकं।तन्मध्येस्थापयित्वातुकुंभंकनकसंयुतं॥१७॥तन्मुखेस्थापयेत्पा

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

त्रंतामंवावेणवंतुवा।अपूपपूरिकान्कुंभान्वस्त्रयुग्मेनवेष्टितान्॥१८॥कृतिभ्भिःप्रतिमाः
पूज्याःशिवाद्यैश्चैवनामभिः।शिवोरुद्रःपशुपतिर्नीलकंठोमहेश्वरः॥१९॥हरिकेशोविरूपा
क्षःत्रिलोकीत्रिपुरांतकः।शंभुर्जटीपशुपतिर्द्वादशाद्याःप्रकीर्तिताः॥२०॥षोडशेरुपचारेश्च
रुद्रमंत्रपुरःसरैः।घृतपूरितदीपांश्चस्थापयेदष्टदिक्षुच॥२१॥सहस्रनामभिस्तोत्रैर्
ग्यजुःसामसंस्तवैः।स्तुत्वाप्रदक्षिणीकृत्यनत्वापूजांसमाप्यच॥२२॥रात्रौजागरणंकुर्या
न्नृत्तगीतादिवृत्तिभिः।प्रभातेविमलेस्नात्वाकृत्वासंध्यादिकाःक्रियाः॥२३॥शुचिर्भूत्वास
मागत्यततःपूजांसमारभेत्।कृत्वेध्माधानपर्यंतंसहस्राणिसहस्रधा॥२४॥ईशान
इतिमंत्रांतेपंकंकुलोपहोमकं।समिदाज्यचरुद्व्यैर्घृताक्तैतिलतंडुलैः॥२५॥द्रापेअंध
सस्पतइतिअनुवाकस्यप्रत्यृचं॥शिवोरुद्रःपशुपतिर्हुत्वाद्वादशनामभिः॥असौजुहोति

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

चतुर्णां दृष्टिधरुत्तरादिभिः। आद्यमध्येजुहोत्यस्तोतत्यत्नीनांयथाक्रमं॥२७॥आद्यापरार्द्धे
जुहुयात्तत्सुतानांयथाक्रमं। नमः सोमायचेत्यादिकृत्वासप्तदशकृतीः॥२८॥ततःस्विष्टकृतंकृत्वाहोमशेषंसमापयेत्। योरुद्रइतिमंत्रेणकृतशेषंनिवेदयेत्॥२९॥अथाचार्यमलंकृतागंदद्याच्चपयस्विनीं। ऋत्विग्भ्योवेदविद्भ्यश्चप्रत्येकंचापिदक्षिणां॥३०॥
दद्याच्चप्रतिमास्तेभ्यशिवाद्यैश्चैवनामभिः। सधान्यंहतसंयुक्तंवस्त्रंदक्षिणसंयुतं॥३१॥
आचार्यायविशेषेणपूजोपकरणैःसह। प्रतिमांवस्त्रसंयुक्तांतत्तन्मंत्रैर्निवेदयेत्॥३२॥
वृषराजंसमाभ्यर्च्यवृषमंत्रेणमंत्रवित्। धर्मस्त्वंवृषरूपेणजगदानंदकारक॥३३॥अ
ष्टमूर्त्तेधिष्ठानमतःपाहिसनातन। वृषस्यवृषणौस्पृष्ट्वाशृंगयोर्मध्यतःशिवं॥३४॥
विलोक्यसहितंदेव्याप्रजितंप्रार्थयेद्धिवं। क्रूरोगादिदारिद्र्यपापरुक्क्षयमृत्यवः॥३५

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

उपायनमिदंतुभ्यंव्रतंसंपूर्णहेतवे॰धायनाद्भुजवयोसौहरण्यंदक्षिण्यंदद्म्यहंभवे॥

अथद्वात्रिंशत्पौर्णमासीव्रतंभाषायांबत्तिशीपौर्णमासीत्युच्यते॥तदुक्तंभविष्ये॥पौर्णिमामार्गशीर्ष
स्थतस्यांमारभ्यतेव्रतं॥उमयासहितोदेवःपूजनीयोमहेश्वरः॥१॥एकेकंदीपंकृत्वामासिमासि
चदापयेत्॥एवंसार्धद्वयंवर्षंद्विमासाधिकमाचरेत्॥२॥नभसःपौर्णिमायांचकुर्याद्युद्यापनंत
तः॥अथवाशुभमास्यपौर्णिमायांसमाचरेत्॥३॥चतुर्दश्यामुपवसेद्व्रात्रौपूजनमारभेत्॥ति
थ्यादिसंकीर्त्यआत्मनःइहजन्मनिजन्मांतरेवावैधव्यनाशपुत्रपौत्रसौभाग्यादिप्राप्तिपूर्वक
भर्तुरायुर्वृद्धिद्वाराउमामहेश्वरप्रीत्यर्थंआचरितस्यद्वात्रिंशत्पौर्णमासीव्रतस्यपूर्णतासिद्ध्
येतदुद्यापनंकर्मकरिष्ये॰ततःवृताचार्यश्चलिंगतोभद्रस्थकलशेहेमंउमामहेशंओंनमःशि
वायेस्थापयेत्॥ततःषोडशोपचारैःसंपूज्य॥प्रातःअग्निस्थापनंअन्वाधायेत्॰अत्रप्र
धानंउमामहेशंयवतिलाज्यद्रव्यैःप्रत्येकंअष्टोत्तरशतसंख्याकाहुतिभिःब्रह्मादिमंडल
देवताभ्यएकैकयाज्याहुत्याहुत्वास्थाल्यै॰ततःद्वात्रिंशद्घृतयुतंवंशपात्रेव्रीह्युपरिस्थेद्वात्रिंशा
न्मोदकान्द्वात्रिंशत्फलवस्त्रदक्षिणाद्युतान्कृत्वाहुत्वा॰संत्रमंत्रः॥महेशाःप्रतिगृह्णा
तुमहेशोवेददानिवामहेशस्तारकोभाभ्यांमहेशायनमोनमः॥१॥॥द्वात्रिंशत्फलैर्दधिपैःसंयुतंवै

तत्॰॥॥॥

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

Kashi Maharani Collection, Ramnagar Fort, Varanasi